**SAMVAD E-JOURNAL**
**ISSN (Online) : 2583-8334**
**(International Peer-Reviewed Refereed Journal)**
**Volume 4, Issue-2, April to June : 2026**
**Published by Rangmati Publication http://www.rangmatipublication.com/**

# पाणिनीयशिक्षायां वर्णविज्ञानम्

*डॉ. समर्थ विजयभाई ओझा*

*सारांशः*

*भारतीयज्ञानपरम्परायां भाषाविषयकचिन्तनस्य स्थानम् अत्यन्तं विशिष्टम् अस्ति। वेदाङ्गेषु शिक्षाशास्त्रं वर्णानाम् उच्चारणस्य स्वरूपं,स्थानं,करणं,प्रयत्नं,मात्राकालं,स्वरभेदं च विशदतया निरूपयति। पाणिनीयशिक्षा शिक्षापरम्परायाः महत्त्वपूर्णः ग्रन्थः अस्ति। अस्यां वर्णविज्ञानं केवलं वर्णानां नामनिर्देशपर्यन्तं सीमितं नास्ति,अपि तु वर्णोत्पत्तेः शारीरिक-ध्वन्यात्मकप्रक्रियायाः सूक्ष्मं विवेचनं दृश्यते। विशेषतः स्थानम्, करणम्,आभ्यन्तरप्रयत्नः तथा बाह्यप्रयत्नः इत्येतेषां पारस्परिकसम्बन्धः अस्याः वर्णोत्पत्तिदृष्टेः मूलाधारः अस्ति।*

*प्रस्तुतशोधलेखे पाणिनीयशिक्षायां प्रतिपादितस्य वर्णविज्ञानस्य आलोचनात्मकमध्ययनं विधीयते। ग्रन्थस्य मूलवचनानाम् आधारेण वर्णस्य स्वरूपं,वर्णोत्पत्तिप्रक्रिया,उच्चारणस्थानानि, करणस्य भूमिका,प्रयत्नस्य द्वैविध्यं,घोष-अघोषविभागः, अल्पप्राण-महाप्राणभेदः, स्वरस्य उदात्त-अनुदात्त-स्वरितभेदः तथा ह्रस्व-दीर्घ-प्लुतमात्राविचारश्च विविच्यते। ततश्च आधुनिकध्वनिविज्ञानस्य कतिपयैः सिद्धान्तैः पाणिनीयवर्णविज्ञानस्य तुलनात्मकमध्ययनं क्रियते। अध्ययनस्य निष्कर्षरूपेण प्रतिपाद्यते यत् पाणिनीयशिक्षायां वर्णः केवलं श्रवणगोचरः वा लेख्यचिह्नरूपः घटकः न,अपि तु स्थान-करण-प्रयत्नादीनां परस्परसापेक्षव्यापारात् निष्पद्यमानः विशिष्टध्वनिघटकः अस्ति। अतः पाणिनीयशिक्षा भारतीयध्वनिविज्ञानस्य व्यवस्थितां निरीक्षणप्रधानां परम्परां प्रतिनिधयति।*

*कूटशब्दाः-पाणिनीयशिक्षा,वर्णविज्ञानम्,ध्वनिविज्ञानम्,वर्णोत्पत्तिः,स्थानम्,करणम्,प्रयत्नः,स्वरः,मात्रा।*

---

**प्रस्तावना**

भारतीयशास्त्रपरम्परायां शब्दस्य स्वरूपविचारः अतीव प्राचीनः। वेदाः भारतीयज्ञानपरम्परायाः मूलाधारत्वेन प्रतिष्ठिताः, तेषां संरक्षणाय च केवलम् अर्थज्ञानं पर्याप्तं न मन्यते स्म। मन्त्राणां स्वरः,मात्रा,वर्णोच्चारणं,पदविभागः तथा पाठक्रमः सर्वमपि शुद्धतया संरक्षितव्यम् आसीत्। वैदिकमन्त्रेषु उच्चारणस्य सूक्ष्मोऽपि विपर्यासः पाठस्य स्वरूपं परिवर्तयितुं शक्नोति। अतः वैदिकपाठस्य मौखिकपरम्परायां ध्वनिविषयकं सूक्ष्मनिरीक्षणं विकसितम् अभवत्।एतादृशायाः परम्परायाः व्यवस्थितं शास्त्रीयस्वरूपं शिक्षाशास्त्रे दृश्यते। षड् वेदाङ्गेषु शिक्षा प्रथमेषु महत्त्वपूर्णेषु च वेदाङ्गेषु परिगण्यते। शिक्षाशास्त्रस्य मुख्यं प्रयोजनं वर्णानाम् उचितोच्चारणं तथा वैदिकस्वरस्य संरक्षणम् अस्ति। पाणिनीयशिक्षा तत्र विशेषमहत्त्वं वहति,यतः अस्यां वर्णानाम् उच्चारणविषये केवलं सामान्योपदेशः न,अपि तु स्थान-करण-प्रयत्नादीनां सूक्ष्मः विश्लेषणक्रमः उपलब्धः।

ग्रन्थस्य प्रारम्भिकवचनमेव तस्य प्रयोजनं स्पष्टयति—

**अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।**
**शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः॥**

अत्र "पाणिनीयं मतम्" इति पदेन विशिष्टस्य शास्त्रीयदृष्टिकोणस्य संकेतः क्रियते। शिक्षायाः निरूपणं यथाक्रमं शास्त्रीयपद्धत्या करणीयमिति "शास्त्रानुपूर्वम्" इति पदेन सूचितम्।

तदनन्तरं ग्रन्थकारः वाचः उच्चारणविधेः स्पष्टीकरणं प्रतिजानाति—प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः।

**पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम्॥**

अत्र "पुनर्व्यक्तीकरिष्यामि" इति पदं महत्त्वपूर्णम्। सामान्यजनानां कृते प्रसिद्धोऽपि शब्दः तस्य शास्त्रीयोच्चारणविधिना न ज्ञायते। अतः शिक्षाशास्त्रस्य प्रयोजनं सामान्यश्रुतस्य शब्दस्य उच्चारणप्रक्रियायाः शास्त्रीयविश्लेषणम् इति निष्पद्यते।अतः पाणिनीयशिक्षायाः अध्ययनं केवलं "कः वर्णः कुत्र उच्चार्यते?"इत्यस्मिन् प्रश्ने परिसमापयितुं न युक्तम्। तदपेक्षया महत्त्वपूर्णः प्रश्नः अस्ति—वर्णः कथम् उत्पद्यते?तस्य उत्पत्तौ शरीरस्य कस्य भागस्य कः व्यापारः भवति?स्थानस्य तथा करणस्य सम्बन्धः कः?प्रयत्नस्य भेदेन वर्णभेदः कथं जायते?एते प्रश्नाः पाणिनीयशिक्षायाः वर्णविज्ञानस्य मूलकेन्द्रं निर्मान्ति।

**वर्णस्य स्वरूपम्**

पाणिनीयशिक्षायां वर्णसंख्याविषये प्रसिद्धं वचनम् अस्ति—

**त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा॥**

अत्र वर्णसंख्यायाः निर्देशः केवलं गणनात्मकविषयः नास्ति। वर्णानां गणना तेषां ध्वन्यात्मकस्वरूपस्य आधारेण भवति। आधुनिकदृष्ट्या "वर्णः" इति लिखितचिह्नं मन्यते,किन्तु शिक्षाशास्त्रीयदृष्ट्या वर्णस्य मूलसम्बन्धः उच्चारणेन अस्ति। लेखनं तस्य प्रतिनिधिरूपं भवति,ध्वनिः तु तस्य मूलभूतं भाषिकस्वरूपम्।भारतीयवर्णमालायाः व्यवस्था अपि अस्य सिद्धान्तस्य समर्थनं करोति। क-वर्गात् प-वर्गपर्यन्तं स्पर्शवर्णानां क्रमः उच्चारणस्थानस्य परिवर्तनं दर्शयति। प्रत्येकवर्गस्य अन्तर्गतं पञ्च वर्णानां विन्यासे पुनः घोष-अघोष,अल्पप्राण-महाप्राण तथा नासिक्यभेदाः व्यवस्थितरूपेण दृश्यन्ते।

क-वर्गस्य उदाहरणं गृह्यताम्—क्,ख्,ग्,घ्,ङ्। अत्र ककार-खकारयोः स्थानं समानम्,किन्तु प्रयत्नभेदः अस्ति। गकार-घकारयोः अपि स्थानसाम्यं वर्तते,किन्तु घोष तथा प्राणभेदेन तयोः ध्वनिस्वरूपं भिन्नम्। ङकारः तु नासिक्यत्वेन विशिष्टः। एवं एकस्मिन् वर्गे एव अनेकध्वन्यात्मकगुणानां व्यवस्थितः समन्वयः दृश्यते।

अतः संस्कृतवर्णमाला केवलं स्मरणोपयोगी क्रमः न,अपि तु ध्वनिवैज्ञानिकवर्गीकरणस्य परिणामः इति मन्तुं शक्यते।

**वर्णोत्पत्तिप्रक्रिया**

पाणिनीयशिक्षायाः वृद्धपाठे वर्णोत्पत्तेः सम्बन्धे महत्त्वपूर्णं वचनं दृश्यते—

**आकाशवायुप्रभवः शरीरात्समुच्चरन् वक्त्रमुपैति नादः।**
**स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥**

अत्र नादस्य शरीरात् निर्गमनं,वक्त्रम् उपगमनं तथा स्थानविशेषेषु विभाजनं प्रतिपादितम्। अस्य वचनस्य भाषावैज्ञानिकमहत्त्वम् अत्यन्तम् अस्ति। ध्वनिः आकस्मिकरूपेण उत्पन्नः पदार्थः न,किन्तु एकस्य प्रक्रियात्मकस्य क्रमस्य फलम्।नादः शरीरात् उत्पद्यते। ततः सः वक्त्रम् उपैति। उच्चारणस्थानविशेषे करणस्य प्रयत्नेन तस्य स्वरूपे परिवर्तनं भवति। तदनन्तरं विशिष्टध्वनिः वर्णत्वं प्राप्नोति। अतः वर्णोत्पत्तेः प्रक्रिया एकस्य गतिशीलस्य नादस्य नियमनपरिणामरूपेण अवगन्तुं शक्यते।अत्र "स्थानान्तरेषु प्रविभज्यमानः" इति पदं विशेषतः विचारणीयम्। एकः मूलभूतः नादः विभिन्नेषु उच्चारणस्थानेषु भिन्नरूपं प्राप्नोति। स्थानपरिवर्तनात् ध्वनिपरिवर्तनं भवति। किन्तु स्थानमेव पर्याप्तं नास्ति; तत्र करणस्य विशिष्टव्यापारः तथा प्रयत्नस्य विशिष्टता आवश्यकौ स्तः।

अतः पाणिनीयशिक्षायाः वर्णोत्पत्तिसिद्धान्तं निम्नलिखितरूपेण संक्षेपेण निरूपयितुं शक्यते—नादः →स्थानविशेषः →करणव्यापारः→प्रयत्नविशेषः→विशिष्टध्वनिः→वर्णः।

अयं क्रमः पाणिनीयशिक्षायाः ध्वनिवैज्ञानिकदृष्टेः मूलभूतं वैशिष्ट्यं प्रकाशयति।

**स्थानविचारः**

वर्णोच्चारणे स्थानस्य महत्त्वं पाणिनीयशिक्षायां स्पष्टतया प्रतिपादितम्—

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च॥**

अत्र अष्टौ स्थानानि निर्दिष्टानि। तथापि पाणिनीयपरम्परायां वर्णानुसारं कण्ठ्य,तालव्य,मूर्धन्य,दन्त्य,ओष्ठ्य इत्यादयः अधिकविशिष्टाः विभागाः अपि प्राप्यन्ते।स्थानस्य अर्थः केवलं शरीरस्य प्रदेशविशेषः नास्ति। यत्र उच्चारणसमये वायुप्रवाहस्य नियमनं भवति तथा करणस्य व्यापारात् विशिष्टध्वनिः निष्पद्यते,तत् स्थानम्। आधुनिकभाषाविज्ञानस्य "place of articulation" इत्यस्य संकल्पनया अस्य तुलनात्मकसम्बन्धः स्थापयितुं शक्यते।

कण्ठस्य,तालुनः,मूर्ध्नः,दन्तानां तथा ओष्ठयोः भिन्नभिन्नः व्यापारः ध्वनिभेदं जनयति। यथा त-वर्गस्य दन्त्यत्वं दन्तप्रदेशस्य उच्चारणक्रियायां महत्त्वं सूचयति; ट-वर्गस्य मूर्धन्यत्वं तु जिह्वाग्रस्य मूर्धप्रदेशे विशेषव्यापारं सूचयति। एवं स्थानपरिवर्तनमेव ध्वनिभेदस्य प्रमुखकारणेषु एकम् अस्ति।

किन्तु स्थानस्य समानतायां सति वर्णयोः भेदः सम्भवति। ककार-खकारयोः उदाहरणं तत्र पर्याप्तम्। उभौ कण्ठ्यौ,स्पर्शवर्णौ च; तथापि खकारे महाप्राणत्वं ककारात् भिन्नं ध्वनिस्वरूपं जनयति। अतः स्थानं वर्णस्य एकमेव निर्धारकतत्त्वं न,किन्तु अनेकतत्त्वेषु एकम्।

**करणविचारः**

स्थानस्य अनन्तरं करणस्य विचारः पाणिनीयशिक्षायां अत्यन्तं महत्त्वपूर्णः। स्थानं यत्र ध्वनिः निष्पद्यते तस्य प्रदेशस्य निर्देशं करोति,करणं तु तस्य प्रदेशे कार्यं कुर्वत् उच्चारणाङ्गं निर्दिशति।जिह्वा अस्मिन् सन्दर्भे सर्वाधिकं गतिशीलं करणम् अस्ति। जिह्वामूलं,जिह्वामध्यम्,जिह्वाग्रम् इत्यादीनां विभिन्नानां भागानां विभिन्नेषु वर्णेषु विशिष्टः व्यापारः भवति। दन्ताः स्थानरूपेण स्वीक्रियन्ते,किन्तु दन्त्यवर्णस्य उच्चारणे जिह्वाग्रस्य विशिष्टः व्यापारः करणरूपेण स्वीक्रियते। तालु स्थानम्,जिह्वामध्यं करणम् इत्यादि सम्बन्धः अपि द्रष्टुं शक्यते।एवं स्थान-करणयोः भेदः अत्यन्तं सूक्ष्मः। यदि उभयोः एकत्वं स्वीक्रियेत,तर्हि वर्णोत्पत्तेः वास्तविकप्रक्रिया स्पष्टा न भवेत्। स्थानं तुलनया क्षेत्रम्,करणं तु तत्र क्रियमाणं सक्रियसाधनम्।

आधुनिकध्वनिविज्ञानस्य दृष्ट्या active articulator तथा passive articulator इत्ययोः यः भेदः,तेन सह पाणिनीयस्थान-करणविचारस्य कार्यात्मकं साम्यं दृश्यते। तथापि आधुनिकशब्दावलीं प्राचीनग्रन्थे प्रत्यक्षतया आरोपयितुं न युक्तम्।

**प्रयत्नविचारः**

पाणिनीयशिक्षायां प्रयत्नस्य द्वैविध्यं स्पष्टतया प्रतिपादितम्—**प्रयत्नोऽपि द्विविधः।आभ्यन्तरो बाह्यश्च॥**प्रयत्नः इति संज्ञा वर्णस्य उच्चारणसमये करणस्य विशिष्टव्यापारं बोधयति। अत्र वर्णस्य ध्वनिरूपं केवलं स्थानपरत्वेन न व्याख्यायते। स्थानविशेषे करणस्य किं स्वरूपं भवति,तस्य व्यापारः कियत्,मुखगुहायां विवरस्य स्थितिः का—इत्यादयः पक्षाः प्रयत्नविचारे अन्तर्भवन्ति।आभ्यन्तरप्रयत्नस्य विश्लेषणे—

- स्पृष्टकरणाः स्पर्शाः।
- ईषत्स्पृष्टकरणा अन्तःस्थाः।
- ईषद्विवृतकरणा ऊष्माणः।
- विवृतकरणाः स्वराः॥

इति विभागः विशेषतः उल्लेखनीयः।

स्पर्शवर्णेषु करणस्य स्थानसह पूर्णतरः सम्पर्कः भवति। अन्तःस्थवर्णेषु तदपेक्षया स्पर्शस्य मात्रा न्यूनतराऽस्ति। ऊष्मवर्णेषु करणस्थानयोः मध्ये विवरं अधिकं भवति। स्वरवर्णेषु तु विवृतता प्रमुखा। अनेन वर्णानां वर्गीकरणं केवलं नामाधारितं न भवति,अपि तु उच्चारणसमये मुखगुहायाः वास्तविकावस्थया सम्बद्धं भवति।एषः प्रयत्नविचारः पाणिनीयशिक्षायाः वैज्ञानिकमूल्यस्य प्रमुखं कारणम् अस्ति। ध्वनिवैशिष्ट्यं शारीरिकव्यापारस्य विशिष्टतया व्याख्यायते। अतः वर्णः केवलं श्रवणीयः परिणामः न,अपि तु एकस्य उच्चारणप्रक्रियायाः फलम्।

**घोष-अघोष तथा अल्पप्राण-महाप्राणविचारः**

वर्णोत्पत्तौ स्थान-करणाभ्यन्तरप्रयत्नाभ्यां सह बाह्यप्रयत्नस्य अपि महत्त्वम् अस्ति। घोष-अघोष तथा अल्पप्राण-महाप्राण इत्येते भेदाः अस्य सन्दर्भस्य प्रमुखाः।क-वर्गस्य प्रथमौ वर्णौ क्,ख् अघोषौ; ग्,घ्,ङ् तु घोषसम्बद्धाः। पुनः क्-ख् तथा ग्-घ् इत्यत्र अल्पप्राण-महाप्राणभेदः दृश्यते। अनेन एकस्मिन् स्थानवर्गे स्थितानां वर्णानामपि प्रयत्नभेदेन परस्परं पृथक्करणं भवति।यथा तकारस्य थकारस्य च स्थानं समानम्। उभौ दन्त्यौ,स्पर्शवर्णौ च। तथापि तकारः अल्पप्राणः,थकारः महाप्राणः। अनेन ज्ञायते यत् वर्णभेदस्य कारणं केवलं स्थानं नास्ति। प्रयत्नविशेषः अपि वर्णस्वरूपस्य निर्णायकः घटकः अस्ति।आधुनिकध्वनिविज्ञानस्य दृष्ट्या अत्र voicing तथा aspiration इत्येतयोः अवधारणाभिः तुलनात्मकं साम्यं स्थापयितुं शक्यते। किन्तु पाणिनीयशिक्षायाः स्वकीयशास्त्रीयपरिभाषां विस्मृत्य आधुनिकसंज्ञया तस्याः पूर्णव्याख्या करणीयेत्यभिप्रायः न ग्राह्यः।

**नासिक्यवर्णविचारः**

प्रत्येकस्य स्पर्शवर्गस्य पञ्चमवर्णः नासिक्यः भवति—ङ्,ञ्,ण्,न्,म्। एतेषां स्थानभेदः अस्ति,किन्तु नासिकामार्गस्य व्यापारः तेषां सामान्यं वैशिष्ट्यम्।अत्र पाणिनीयवर्णविन्यासस्य सूक्ष्मता पुनः प्रकाशते। एकस्मिन् वर्गे स्थानं समानं भवति,किन्तु पञ्चमवर्णे नासिक्यत्वं विशिष्टगुणरूपेण जुह्यते। अर्थात् वर्णस्य परिचयः एकेन गुणेन न समाप्तः; स्थान,प्रयत्न तथा ध्वनिगुणानां समन्वयेन सः निश्चितः भवति।आधुनिकभाषाविज्ञानस्य nasal consonants इत्येषां वर्गीकरणेन अयं विचारः तुलनीयः। तथापि पाणिनीयशिक्षायां नासिक्यत्वस्य निरूपणं स्वकीयवर्णव्यवस्थायाः अन्तर्गतं भवति।

**स्वरविचारः तथा मात्राकालः**

पाणिनीयशिक्षायां स्वरविज्ञानस्य विशिष्टं स्थानम् अस्ति। उक्तम्—

**उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः।**
**ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि॥**

अत्र स्वरस्य त्रयः भेदाः—उदात्तः,अनुदात्तः तथा स्वरितः—प्रतिपादिताः। तेषां सार्थं ह्रस्व,दीर्घ तथा प्लुत इति कालभेदः अपि निर्दिष्टः।एतत् अत्यन्तं सूक्ष्मं निरीक्षणम् अस्ति। ध्वनेः स्वरूपं केवलं "कः स्वरः?" इत्यनेन न पूर्णं भवति। तस्य उच्चारणकालः अपि तस्य भाषिकस्वरूपे प्रभावं जनयति। ह्रस्वस्य कालः दीर्घात् न्यूनः,दीर्घस्य ह्रस्वात् अधिकः,प्लुतस्य तदपेक्षया अधिकः।वैदिकपाठे स्वरस्य महत्त्वं विशेषम्। उदात्त-अनुदात्त-स्वरितभेदाः मन्त्रपाठस्य शुद्धतां संरक्षन्ति। अतः स्वरविचारः पाणिनीयशिक्षायां केवलं ध्वनिवैज्ञानिकः न,अपि तु वैदिकपरम्परासंरक्षणस्य आधारभूतः।

आधुनिकध्वनिविज्ञानस्य दृष्ट्या उदात्तादिभेदाः pitch इत्यनेन तथा मात्राभेदः duration इत्यनेन तुलनीयः। तथापि वैदिकस्वरव्यवस्थायाः सम्पूर्णस्वरूपं आधुनिक pitch-सिद्धान्तेन समीकर्तुं न युक्तम्। वैदिकस्वरस्य स्वकीयः ऐतिहासिकः तथा पाठपरम्परासम्बद्धः सन्दर्भः अस्ति।

**पाणिनीयशिक्षायां वर्णवर्गीकरणस्य तर्कः**

पाणिनीयशिक्षायाः वर्णवर्गीकरणे आन्तरिकः तर्कः दृश्यते। पञ्चवर्गीयव्यवस्थायां स्थानं प्रमुखं निर्धारकतत्त्वम्। प्रत्येकस्मिन् वर्गे पञ्च वर्णानां क्रमः प्रयत्न तथा घोषादिभेदेन व्यवस्थितः।क-वर्गात् प-वर्गपर्यन्तं—कण्ठ्य →तालव्य→मूर्धन्य →दन्त्य→ओष्ठ्य
इति स्थानपरिवर्तनं दृश्यते। पुनः प्रत्येकवर्गे—अघोष-अल्पप्राण →अघोष-महाप्राण→घोष-अल्पप्राण→घोष-महाप्राण→नासिक्यइति आन्तरिकक्रमः दृश्यते।अतः वर्णमालायाः क्रमः द्विस्तरीयतर्काधारितः अस्ति—स्थानक्रमः तथा प्रयत्नक्रमः। एतत् संस्कृतवर्णमालायाः अद्वितीयं वैशिष्ट्यं मन्यते।

**पाणिनीयशिक्षा तथा व्याकरणपरम्परा**

शिक्षा तथा व्याकरणयोः सम्बन्धः अत्यन्तं निकटः। शिक्षा वर्णस्य शुद्धोच्चारणं विवृणोति,व्याकरणं तु तेषां वर्णानां साहाय्येन शब्दरूपस्य निर्माणप्रक्रियां विवृणोति। अतः शिक्षाशास्त्रं व्याकरणस्य ध्वन्यात्मकभूमिं निर्माति।पाणिनीयव्याकरणे वर्णसमाम्नायस्य,प्रत्याहारव्यवस्थायाः तथा ध्वनिसम्बद्धनियमस्य उपयोगः बहुधा भवति। यदि वर्णानां स्थान-प्रयत्नादिविषयकं मूलभूतज्ञानं न स्यात्,तर्हि पाणिनीयव्याकरणस्य ध्वन्यात्मकव्यवस्थां पूर्णतया अवगन्तुं कठिनं भवेत्।अतः पाणिनीयशिक्षा पाणिनीयव्याकरणस्य केवलं सहायकग्रन्थः न,अपि तु ध्वनिवैज्ञानिकपृष्ठभूमेः महत्त्वपूर्णः स्रोतः इति स्वीकरणीयम्।

**पाणिनीयशिक्षायाः आधुनिकध्वनिविज्ञानेन सह तुलनात्मकदृष्टिः**

आधुनिकध्वनिविज्ञानस्य प्रमुखेषु विषयेषु place of articulation, manner of articulation, voicing, aspiration, duration तथा pitch इत्यादयः सन्ति। पाणिनीयशिक्षायां स्थानम्,प्रयत्नः,घोषः,प्राणः,मात्रा तथा स्वरः इत्यादीनां विवेचनं प्राप्यते।स्थानम् आधुनिकस्य place of articulation इत्यस्य कार्यात्मकतुलनां वहति। करणं active articulator इत्यस्य समीपवर्ती संकल्पना अस्ति। प्रयत्नस्य भेदाः manner of articulation इत्यस्य कतिपयैः पक्षैः तुलनीयाः। घोष-अघोषविभागः voicing इत्यनेन,अल्पप्राण-महाप्राणविभागः aspiration इत्यनेन,ह्रस्व-दीर्घ-प्लुतभेदः duration इत्यनेन तथा उदात्त-अनुदात्त-स्वरितभेदः pitch इत्यनेन तुलनीयः।

किन्तु अत्र आलोचनात्मकदृष्टिः अनिवार्या। आधुनिकध्वनिविज्ञानं प्रयोगात्मकमापनस्य,ध्वनितरङ्गविश्लेषणस्य तथा आधुनिकशारीरविज्ञानस्य साधनैः विकसितम्। पाणिनीयशिक्षा तु वैदिकपाठपरम्परायाः आवश्यकताभ्यः तथा सूक्ष्मनिरीक्षणपरम्परायाः आधारात् विकसिताऽस्ति। अतः उभयोः मध्ये साम्यंसंकल्पनात्मकं वा कार्यात्मकं वाभवितुमर्हति,किन्तु तयोः ऐतिहासिकसमता न स्वीकरणीया।अयं भेदः पाणिनीयशिक्षायाः महत्त्वं न न्यूनयति। प्रत्युत,स्वकीयऐतिहासिकसन्दर्भे तस्याः निरीक्षणशक्तेः मूल्याङ्कनं अधिकं वैज्ञानिकं भवति।

**आलोचनात्मकविमर्शः**

पाणिनीयशिक्षायाः वैज्ञानिकतायाः परीक्षणे सर्वप्रथमं तस्याः वर्गीकरणपद्धतेः परीक्षणं करणीयम्। ग्रन्थे ध्वनिविषयकं ज्ञानं अव्यवस्थितरूपेण न प्रस्तुतम्। वर्णसंख्या,स्थानम्,करणम्,प्रयत्नः,स्वरः,मात्रा इत्यादयः परस्परं सम्बद्धाः।द्वितीयं,पाणिनीयशिक्षा वर्णस्य बाह्यरूपेण अपेक्षया तस्य उत्पत्तिप्रक्रियां महत्त्वं ददाति। नादस्य शरीरात् निर्गमनम्,वक्त्रम् उपगमनम् तथा स्थानविशेषे विभाजनम् इति प्रक्रिया वर्णोत्पत्तेः गतिशीलस्वरूपं सूचयति।

तृतीयं,समानस्थानवर्णानां प्रयत्नभेदेन वर्गीकरणं तस्याः सूक्ष्मदृष्टेः परिचायकम्। ककार-खकार,गकार-घकार,तकार-थकार इत्यादीनां भेदाः अस्य उत्तमं उदाहरणम्।

चतुर्थं,वर्णस्य केवलं उच्चारणस्थानं न,अपि तु करणस्य प्रकारः तथा प्रयत्नस्य स्वरूपमपि वर्णनिर्धारणे महत्त्वपूर्णं भवति। एतत् बहुपरिमाणात्मकवर्णविज्ञानस्य स्वरूपं दर्शयति।पञ्चमं,स्वर-मात्राविचारः ध्वन्याः कालिक तथा श्रुत्यात्मक आयामयोः ज्ञानं सूचयति। अतः पाणिनीयशिक्षायां ध्वनिः स्थिरघटकः न,अपि तु काल,स्थान,प्रयत्न तथा स्वरादिभिः निर्धारितः बहुआयामी भाषिकघटकः।

**शोधस्य मौलिकता**

प्रस्तुतशोधस्य मुख्यं वैशिष्ट्यं स्थान-करण-प्रयत्नानां पृथक्-पृथक् वर्णनं न,अपि तु तेषांसमन्वितवर्णोत्पत्तिसिद्धान्तस्यस्थापना अस्ति।स्थानं ध्वन्युत्पत्तेः क्षेत्रं निर्दिशति। करणं तस्मिन् क्षेत्रे सक्रियतया कार्यं कुर्वत् उच्चारणाङ्गं निर्दिशति। प्रयत्नः तस्य करणस्य विशिष्टव्यापारं निर्दिशति। एतेषां त्रयाणां परस्परसम्बन्धेन विशिष्टध्वनिः निष्पद्यते।

अतः पाणिनीयशिक्षायाः वर्णविज्ञानं केवलं वर्गीकरणशास्त्रं न,अपि तुवर्णोत्पत्तेः प्रक्रियात्मकमॉडलम्इति प्रतिपादयितुं शक्यते।अस्य दृष्टिकोणस्य आधुनिकभाषाविज्ञानेऽपि उपयोगिता भवितुमर्हति। विशेषतः संस्कृतध्वनिविज्ञानस्य computational modelling, speech technology, pronunciation training तथा Sanskrit language technology इत्यादिषु क्षेत्रेषु पाणिनीयवर्णवर्गीकरणस्य पुनर्व्याख्या अनुसन्धानस्य नूतनान् मार्गान् उद्घाटयितुं शक्नोति।

**उपसंहारः**

पाणिनीयशिक्षायाः समग्राध्ययनेन भारतीयभाषावैज्ञानिकपरम्परायाः सूक्ष्मता स्पष्टतया प्रकाशते। वर्णस्य स्वरूपं,तस्योत्पत्तिः,उच्चारणस्थानम्,करणम्,प्रयत्नः,घोषः,प्राणः,स्वरः तथा मात्रा इत्यादयः विषयाः पृथक्-पृथक् न,अपि तु परस्परसम्बद्धतया प्रतिपादिताः सन्ति।विशेषतः स्थान-करण-प्रयत्नत्रयस्य समन्वयः पाणिनीयवर्णविज्ञानस्य केन्द्रस्थं तत्त्वम् अस्ति। स्थानं ध्वन्युत्पत्तेः क्षेत्रं,करणं सक्रियसाधनं,प्रयत्नश्च तस्य साधनस्य विशिष्टव्यापारं निर्दिशति। एतेषां समन्वयात् विशिष्टवर्णध्वनिः निष्पद्यते।

पाणिनीयशिक्षायां वर्णस्य एतादृशं प्रक्रियात्मकं स्वरूपं भारतीयभाषाचिन्तनस्य उन्नततां दर्शयति। पञ्चवर्गीयवर्णव्यवस्था,घोष-अघोषभेदः,अल्पप्राण-महाप्राणभेदः,नासिक्यत्वम्,स्वरस्य उदात्त-अनुदात्त-स्वरितभेदः तथा ह्रस्व-दीर्घ-प्लुतमात्राविचारः—एते सर्वे मिलित्वा एकं व्यवस्थितं ध्वनिवैज्ञानिकप्रतिमानं निर्मान्ति।

आधुनिकध्वनिविज्ञानस्य प्रकाशे पाणिनीयशिक्षायाः अनेकाः अवधारणाः तुलनीयाः सन्ति। तथापि तयोः पूर्णतादात्म्यं स्थापयितुं न युक्तम्। पाणिनीयशिक्षायाः महत्त्वं आधुनिकशास्त्रस्य पूर्वरूपत्वे एव न,अपि तु स्वकीयऐतिहासिकसन्दर्भे विकसितस्य सूक्ष्मनिरीक्षणप्रधानस्य ध्वनिवैज्ञानिकचिन्तनस्य मौलिकतायाम् अस्ति।

अतः निष्कर्षतः वक्तुं शक्यते—

**"पाणिनीयशिक्षायां वर्णः केवलं लेख्यचिह्नं वा श्रवणगोचरः ध्वनिघटकः न, अपि तु स्थान-करण-प्रयत्नानां समन्वितव्यापारात् निष्पद्यमानः विशिष्टः भाषिकध्वनिघटकः।"**

एषा एव पाणिनीयशिक्षायाः वर्णविज्ञानस्य मूलभूता विशेषता। अस्याः दृष्टेः पुनरध्ययनं संस्कृतभाषायाः ध्वन्यात्मकस्वरूपस्य,भारतीयभाषावैज्ञानिकपरम्परायाः तथा आधुनिकभाषातन्त्रज्ञानस्य च क्षेत्रेषु महत्त्वपूर्णं योगदानं दातुं शक्नोति।

---

सन्दर्भग्रन्थाः

१. पाणिनिः —पाणिनीयशिक्षा।

२. पाणिनिः —अष्टाध्यायी।

३. पतञ्जलिः —महाभाष्यम्।

४. शौनकः —ऋक्प्रातिशाख्यम्।

५.तैत्तिरीयप्रातिशाख्यम्।

६. याज्ञवल्क्यः —याज्ञवल्क्यशिक्षा।

७. Ghosh,Manomohan — PāṇinīyaŚikṣā.

८. Allen, W. Sidney — Phonetics in Ancient India.

९. कर्ण,बलभद्रः — "पाणिनीयशिक्षायां संस्कृतवर्णविचारः", International Journal of Sanskrit Research, 8(3), 2022.